# Ashwalayana gruhya sutra bhashyam.pdf/३४६



**Exported from Wikisource on ४ जनवरीमासः २०२५**

एतत् पृष्ठम् अपरिष्कृतम् अस्ति

APPENDIX ३०६ यथा भूमिरग्निगर्भा यथा द्यौरिन्द्रेण गर्भिणी । वायुर्यथा दिशां गर्भ एवं गर्भं दधाम्यसौ ' ॥ इति वा ॥ ६ ॥ उक्तं तृतीये मासि पुंसवनं चतुर्थेऽनवलोभनम् । 'ब्रह्मणाग्निः संविदानः ' इति षट् प्राजापत्यस्य स्थालीपाकस्य हुत्वा 'अक्षीभ्यां ते नासिकाभ्याम्' इति प्रत्यृचमाज्यलेपेनाङ्गान्यभिमृशेत् । व्याख्यातं सीमन्तोन्नयनं प्रथमगर्भे ॥ १० ॥

अनवलोभनं व्याख्यास्यामः । चरुद्वयं च कुर्वीत प्राजापत्यं च पौरुषम् । 'हिरण्यगर्भः समवर्तताग्रे' इति प्राजापत्ये जुहुयात् । सहस्रशीर्षा' इति द्वितीये । गुर्विण्याः कुक्षिमभिमन्त्रयेत 'आयुष्यम्' इति सूक्तेन । ब्राह्मणान् भोजयित्वा स्वस्त्ययनं वाचयीत ।।११ ।। ग्राम्यस्वाध्यायमधीत्याथारण्यमधीयीत । अथास्य व्रतानि भवन्ति । सावित्रं वेदव्रतं माहानाम्न्यं व्रातिकमौपनिषदं गौदानिक सौपर्णं चेति । ' त्वं व्रतानां व्रतपतिरसि' इति । सर्वव्रतेषु चैवम् । यथायथमादेशः । व्रतं कीर्तयेदग्निमीक्षमाणः । ' स्मृतं च मे अस्मृतं च मे तन्म उभयव्रतम्' इति । एवमुत्तरेषु सर्वेषु पदेषु वदेत् 1 जातकर्मणि चेन्न गृहीतः स्यादथ समावर्तनाग्नि परि- गृह्णीयात् । यत्नान्त्यां समिधमादधाति तं परिगृह्णाति । स आवसथ्यः । तस्मिन् गृह्यकर्माणि कुर्युः । तदापि न गृहीतः स्याद् वैवायमग्निमादधीत । वैवाह्योऽपि न गृहीतः स्यादमावास्यायां वैश्यकुलादाहृत्य शुचौ देशे स्थापयित्वा अस्तमित आदित्य औदुम्ब-

# About this digital edition

This e-book comes from the online library Wikisource[1]. This multilingual digital library, built by volunteers, is committed to developing a free accessible collection of publications of every kind: novels, poems, magazines, letters...

We distribute our books for free, starting from works not copyrighted or published under a free license. You are free to use our e-books for any purpose (including commercial exploitation), under the terms of the Creative Commons Attribution-ShareAlike 3.0 Unported[2] license or, at your choice, those of the GNU FDL[3].

Wikisource is constantly looking for new members. During the realization of this book, it's possible that we made some errors. You can report them at this page[4].

The following users contributed to this book:

- Srkris

---

1. ↑ https://wikisource.org

2. ↑ https://www.creativecommons.org/licenses/by-sa/3.0
3. ↑ https://www.gnu.org/copyleft/fdl.html
4. ↑ https://wikisource.org/wiki/Wikisource:Scriptorium